## संक्षिप्तप्रश्नाः तदुत्तराणि च

१. काव्यं किम्?

उत्तरम्– काव्यस्य लक्षणविषये विश्वनाथेन उक्तम्-"वाक्यं रसात्मकं काव्यम्"।

२. काव्यमिति पदस्य व्युत्पत्तिः का?

उत्तरम्– 'कवि+ ष्यञ्' प्रत्ययेन काव्यमिति शब्दः निष्पन्नः।

३. काव्यं कतिविधम्?

उत्तरम्– काव्यं द्विविधम्। श्रव्यकाव्यं दृश्यकाव्यं चेति।

४. श्रव्यकाव्यं नाम किम्?

उत्तरम्– श्रव्यकाव्यस्य लक्षणविषये विश्वनाथेन उक्तम्– 'श्रव्यं श्रोतव्यमात्रम्'।

५. श्रव्यकाव्यं कतिविधम्?

उत्तरम्– श्रव्यकाव्यं त्रिविधम्– पद्यं, गद्यं, मिश्रं चम्पूः वा इति।

६. चम्पूकाव्यं किम्?

उत्तरः अलङ्कारशास्त्रे चम्पूकाव्यस्य लक्षणमुक्तम्– "गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते"। अर्थात् गद्यपद्यमिश्रितं काव्यं चम्पूकाव्यम्।

७. पद्यकाव्यं किम्? तत् कतिविधम्?

उत्तरम्– वृत्तं चतुष्पदी पद्यम्। तत् द्विविधम्– महाकाव्यं खण्डकाव्यञ्चेति।

८. महाकाव्यस्य लक्षणं किम्?

उत्तरम्– महाकाव्यस्य लक्षणविषये विश्वनाथेन उक्तम्–

"सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।
सद्वंश क्षत्रियो वापि धीरोदात्तगुणान्वितः॥

९. कस्तावत् महाकाव्यस्य मूख्यरसः?

➡ उत्तरम्— शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते। अर्थात्— शृङ्गारादि एकः महाकाव्यस्य मुख्यरसः।

१०. महाकाव्यस्य मुख्यफलं किम्?

➡ उत्तरम्— धर्मार्थकाममोक्षाणां चतुर्वर्गाणां कश्चित् एक एव महाकाव्यस्य मुख्यफलम्।

११. महाकाव्यस्य विषयः कः?

➡ उत्तरम्— खलानां निन्दा सज्जानानां प्रशंसा एव महाकाव्यस्य विषयः।

१२. महाकाव्यस्य नायकः कथं भवेत्?

➡ उत्तरम्— महाकाव्यस्य नायकः भवेत् देवता सद्वंशः क्षत्रियः वा।

१३. महाकाव्यस्य सर्गसंख्याः कति?

➡ उत्तरम्— महाकाव्यस्य सर्गसंख्या अष्टाधिका भवेत्।

१४. संस्कृतसाहित्ये प्राचीनतमं महाकाव्यं किम्? तस्य सर्गसंख्याः कति?

➡ उत्तरम्— संस्कृतसाहित्ये प्राचीनतमं महाकाव्यम् अश्वघोषस्य बुद्धचरितम्। तस्य सर्गसंख्या सप्तदश।

१५. बुद्धचरितस्य मुख्यरसः कोऽस्ति?

➡ उत्तरम्— बुद्धचरितस्य मुख्यरसः शान्तरसः।

१६. अश्वघोषः कः आसीत्?

➡ उत्तरम्— अश्वघोषः बौद्धसन्न्यासी आसीत्।

१७. अश्वघोषस्य समयकालः कः आसीत्? तस्य सभाकवेः नाम किम्?

➡ उत्तरम्— अश्वघोषस्य समयकालः ख्रीष्टीयप्रथमशतकः। अश्वघोषस्य सभाकवेः नाम कुषाणराजः कनिष्कः।

१८. अश्वघोषस्य उपाधिः विशेषणं वा किम्?

➡ उत्तरम्— आचार्यः, भदन्तः, महाकविः, महावादि, भदण्डः इत्यादयः।

१९. अश्वघोषस्य मातुर्नाम किम्?

➡ उत्तरम्— अश्वघोषस्य मातुर्नाम सुवर्णाक्षी देवी।

२०. सौन्दरनन्दमिति महाकाव्यं कस्य रचना अस्ति?

➡ उत्तरम्— सौन्दरनन्दमिति महाकाव्यम् अश्वघोषस्य रचना अस्ति।

२१. सौन्दरनन्दमहाकाव्यस्य कति सर्गाः सन्ति? तस्य मुख्यरसः कः?

➡ उत्तरम्— सौन्दरनन्दमहाकाव्यस्य अष्टादश सर्गाः सन्ति। तस्य मुख्यरसः शान्तः।

२२. कालिदासस्य समयकालः कः आसीत्?

➡ उत्तरम्— कालिदासस्य समयकालः ख्रीष्टीयः चतुर्थ-पञ्चमशतकः आसीत्।

२३. कालिदासस्य पृष्ठपोषकः कः आसीत्?

➡ उत्तरम्— राजा द्वितीयचन्द्रगुप्तः कालिदासस्य पृष्ठपोषकः आसीत्।

२४. कालिदासस्य काव्ये कस्याः रीत्येः प्रयोगः दृश्यते?

उत्तरम्— कालिदासस्य काव्ये वैदर्भीरीत्याः प्रयोगः दृश्यते

२५. कालिदासस्य कति महाकाव्यानि सन्ति?

उत्तरम्— कालिदासस्य महाकाव्यद्वयमस्ति— कुमारसम्भवम्, रघुवंशं चेति।

२६. कुमारसम्भवमहाकाव्ये कति सर्गाः सन्ति?

उत्तरम्— कुमारसम्भवमहाकाव्ये सप्तदश सर्गाः सन्ति।

२७. कुमारसम्भवमहाकाव्ये कुमारः कः? कुमारः इति शव्दस्य कोऽर्थ?

उत्तरम्— कुमारसम्भवमहाकाव्ये कुमारः कार्तिकियः अस्ति। कुमारस्य कार्तिकियस्य जन्म एव कुमारशव्दस्यार्थः।

२८. कुमारसम्भवमहाकाव्यस्य उत्सः कः?

उत्तरम्— कुमारसम्भवमहाकाव्यस्य उत्सः स्कन्धपुराणं, शिवपुराणमिति।

२९. कुमारसम्भवमहाकाव्ये वर्णितः विषयः कः?

उत्तरम्— कुमारसम्भवमहाकाव्ये वर्णितः विषयः ताडकासुरवधः।

३०. कुमारसम्भवमहाकाव्यस्य प्रसिद्धः टीकाकारः कः आसीत्? तस्याः टीकायाः नाम किम्?

उत्तरम्— कुमारसम्भवमहाकाव्यस्य प्रसिद्धः टीकाकारः मल्लिनाथः आसीत्। तस्याः टीकायाः नाम सञ्जीवनी।

३१. रघुवंशमहाकाव्यस्य उत्सः कः?

उत्तरम्— रघुवंशमहाकाव्यस्य उत्सः रामायणम्, विष्णुपुराणञ्चेति।

३२. रघुवंशमहाकाव्यस्य कति सर्गाः सन्ति?

उत्तरम्— रघुवंशमहाकाव्यस्य [illegible]ति सर्गाः सन्ति।

३३. रघुवंशमहाकाव्यस्य मु[illegible]रसः कः?

उत्तरम्— रघुवंशमहाकाव्यस्य मुख्यरसः वीररसः।

३४. रघुवंशमहाकाव्ये कियन्तः रघुराजानः वर्णिताः सन्ति?

उत्तरम्— रघुवंशमहाकाव्ये ऊनत्रिंशत् रघुराज्ञां वर्णनाः सन्ति।

३५. रघुवंशे प्रथमः तथा अन्तिमः राजा कोऽस्ति?

उत्तरम्— प्रथमः दिलीपः, अन्तिमश्च अग्निवर्णः।

३६. रघुवंशमहाकाव्यस्य प्रसिद्धः टीकाकारः कः आसीत्? तस्याः टीकायाः नाम किम्?

उत्तरम्— रघुवंशमहाकाव्यस्य प्रसिद्धः टीकाकारः मल्लिनाथः आसीत्। तस्याः टीकायाः नाम सञ्जीवनी।

३७. रघुवंशमहाकाव्यस्य रघुः कः?

उत्तरम्— रघुवंशमहाकाव्यस्य दीलिपस्य पुत्रः रघुः आसीत्।

३८. किरातार्जुनीयम् केन विरचितम्?

➡ उत्तरम्— किरातार्जुनीयं महाकविना भारविना विरचितम्।

३९. भारविः इति पदस्य कोऽर्थ?

➡ उत्तरम्— भारविपदस्यार्थः सूर्यतिजः।

४०. भारवेः नामान्तरं किम्?

➡ उत्तरम्— भारवेः नामान्तरं दामोदरः इति।

४१. भारवेः समयकालः कः आसीत्?

➡ उत्तरम्— भारवेः समयकालः ख्रीष्टीयः षष्ठशतकः आसीत्।

४२. भारवेः काव्यिकोपाधिः कः आसीत्? स केन गुणेन पर्यभूषितः आसीत्?

➡ उत्तरम्— छत्रभारविः इति भारवेः काव्यिकोपाधिः आसीत्। स "अर्थगौरवः" इति गुणेन पर्यभूषितः आसीत्।

४३. किरातार्जुनीयमहाकाव्यस्य कियन्तः सर्गाः सन्ति?

➡ उत्तरम्— किरातार्जुनीयमहाकाव्यस्य अष्टादश सर्गाः सन्ति।

४४. किरातार्जुनीयग्रन्थस्य उत्सः कः?

➡ उत्तरम्— किरातार्जुनीयग्रन्थस्य उत्सः महाभारतस्य बनपर्वः।

४५. किरातार्जुनीयग्रन्थे कियन्तः सर्गाः सन्ति?

➡ उत्तरम्— किरातार्जुनीयग्रन्थे अष्टादश सर्गाः सन्ति।

४६. किरातार्जुनीयग्रन्थस्य मुख्यरसः कः?

➡ उत्तरम्— किरातार्जुनीयग्रन्थस्य मुख्यरसः वीररसः।

४७. श्रीशब्दात्मकं काव्यं किम्?

➡ उत्तरम्— श्रीशब्दात्मकं काव्यं किरातार्जुनीयम्।

४८. किरातार्जुनीयग्रन्थस्य नायकः कः?

➡ उत्तरम्— किरातार्जुनीयग्रन्थस्य नायकः अर्जुनः।

४९. किरातार्जुनीयग्रन्थस्य नायिका का?

➡ उत्तरम्— किरातार्जुनीयग्रन्थस्य नायिका द्रौपदी।

५०. किरातार्जुनीयग्रन्थस्य प्रतिनायकः कः?

➡ उत्तरम्— किरातार्जुनीयग्रन्थस्य प्रतिनायकः किरातरूपी-शिवः।

५१. किरातार्जुनीयग्रन्थस्य किरातः कः?

➡ उत्तरम्— किरातार्जुनीयग्रन्थस्य किरातः छद्मवेशी-शिवः।

५२. किरातार्जुनीयग्रन्थस्य टीकाकारः कः? तस्याः टीकायाः नाम कः?

➡ उत्तरम्— किरातार्जुनीयग्रन्थस्य टीकाकारः मल्लिनाथसूरी। तस्याः टीकायाः नाम "घन्टापथ" इति।

५३. कः ग्रन्थः बृहत्त्रयी नाम्ना परिचितः?

➡ उत्तरम्— भारविणा विरचितं किरातार्जुनीयं महाकाव्यं बृहत्त्रयी नाम्ना परिचितः।

५४. भारविना कं वर्णमाश्रित्य श्लोकः विरच्यते?

➡ उत्तरम्— 'न' वर्णमाश्रित्य भारविः श्लोकं रचयति। न नोनुनोन्नो........इति।

५५. शिशुपालवधम् केन विरचितम्?

➡ उत्तरम्— महाकविमाघेन शिशुपालवधमिति महाकाव्यं विरचितम्।

५६. माघस्य आविर्भावकालः कः?

➡ उत्तरम्— माघस्य आविर्भावकालः ख्रीष्टीयः सप्तमशतकः।

५७. शिशुपालवधमहाकाव्यस्य उत्सः कः?

➡ उत्तरम्— शिशुपालवधमहाकाव्यस्य उत्सः महाभारतम्, श्रीमद्भागवद्गीता, विष्णुपुराणञ्च।

५८. शिशुपालवधमहाकाव्यस्य सर्गसंख्याः काः?

➡ उत्तरम्— शिशुपालवधमहाकाव्ये विंशति सर्गाः सन्ति।

५९. शिशुपालवधस्य नायकः कः?

➡ उत्तरम्— शिशुपालवधस्य नायकः श्रीकृष्णः।

६०. शिशुपालवधस्य मुख्यरसः कः?

➡ उत्तरम्— शिशुपालवधस्य मुख्यरसः वीररसः।

६१. महाकविमाघस्य उपाधिः कः?

➡ उत्तरम्— महाकविमाघस्य उपाधिः घण्टामाघः।

६२. शिशुपालवधस्य मल्लिनाथस्य विरचितायाः टीकायाः नाम किम्?

➡ उत्तरम्— शिशुपालवधस्य मल्लिनाथस्य विरचितायाः टीकायाः नाम सर्वङ्कषा।

६३. शिशुपालवधमहाकाव्ये कस्य पर्वतस्य वर्णना दृश्यते?

➡ उत्तरम्— शिशुपालवधमहाकाव्ये रैवतकपर्वतस्य वर्णना दृश्यते।

६४. माघस्य प्रशंसावाक्यं किम्?

➡ उत्तरम्— "उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः"॥

६५. भट्टिकाव्यं केन विरचितम्?

➡ उत्तरम्— महाकविना भट्टिना भट्टिकाव्यं विरचितम्।

६६. भर्तृहरिः कः आसीत्?

➡ उत्तरम्— भर्तृहरिः वैयाकरणः अपि च भाषाविद् आसीत्।

६७. भतृहरिः समयकालः कः?

➡ उत्तरम्— भर्तृहरिः समयकालः ख्रीष्टीयः षष्ठशतकः।

६८. भतृहरिः पृष्ठपोषकः राजा कः?

➡ उत्तरम्— श्रीधरपुत्रः महाराजः नरेन्द्रः भर्तृहरेः पृष्ठपोषकः राजा आसीत्।